सौंदर्यलहरी

सौंदर्यलहरी

शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
न चेदेवं देवो न खलु कुशलः स्पंदितुमपि |
अतस्त्वामाराध्यां हरिहरविरिंचादिभिरपि
प्रणंतुं स्तोतुं वा कथमकृतपुण्यः प्रभवति || 1 ||

तनीयांसं पांसुं तव चरणपंकेरुहभवं
विरिंचिः संचिन्वन्विरचयति लोकानविकलं |
वहत्येनं शौरिः कथमपि सहस्रेण शिरसां
हरः संक्षुद्यैनं भजति भसितोद्धूलनविधिं || 2 ||

अविद्यानामंतस्तिमिरमिहिरद्वीपनगरी
जडानां चैतन्यस्तबकमकरंदस्रुतिझरी |
दरिद्राणां चिंतामणिगुणनिका जन्मजलधौ
निमग्नानां दंष्ट्रा मुररिपुवराहस्य भवती || 3 ||

त्वदन्यः पाणिभ्यामभयवरदो दैवतगण-
-स्त्वमेका नैवासि प्रकटितवराभीत्यभिनया |
भयात्त्रातुं दातुं फलमपि च वांछासमधिकं
शरण्ये लोकानां तव हि चरणावेव निपुणौ || 4 ||

हरिस्त्वामाराध्य प्रणतजनसौभाग्यजननीं
पुरा नारी भूत्वा पुररिपुमपि क्षोभमनयत् |
स्मरोऽपि त्वां नत्वा रतिनयनलेह्येन वपुषा
मुनीनामप्यंतः प्रभवति हि मोहाय महतां || 5 ||

धनुः पौष्पं मौर्वी मधुकरमयी पंच विशिखा
वसंतः सामंतो मलयमरुदायोधनरथः |
तथाप्येकः सर्वं हिमगिरिसुते कामपि कृपा-
-मपांगात्ते लब्ध्वा जगदिदमनंगो विजयते || 6 ||

क्वणत्कांचीदामा करिकलभकुंभस्तननता
परिक्षीणा मध्ये परिणतशरच्चंद्रवदना |
धनुर्बाणान्पाशं सृणिमपि दधाना करतलैः
पुरस्तादास्तां नः पुरमथितुराहोपुरुषिका || 7 ||

सुधासिंधोर्मध्ये सुरविटपिवाटीपरिवृते
मणिद्वीपे नीपोपवनवति चिंतामणिगृहे |
शिवाकारे मंचे परमशिवपर्यंकनिलयां
भजंति त्वां धन्याः कतिचन चिदानंदलहरीं || 8 ||

महीं मूलाधारे कमपि मणिपूरे हुतवहं
स्थितं स्वाधिष्ठाने हृदि मरुतमाकाशमुपरि |
मनोऽपि भ्रूमध्ये सकलमपि भित्त्वा कुलपथं
सहस्रारे पद्मे सह रहसि पत्या विहरसे || 9 ||

सुधाधारासारैश्चरणयुगलांतर्विगलितैः
प्रपंचं सिंचंती पुनरपि रसाम्नायमहसः |
अवाप्य स्वां भूमिं भुजगनिभमध्युष्टवलयं
स्वमात्मानं कृत्वा स्वपिषि कुलकुंडे कुहरिणि || 10 ||

चतुर्भिः श्रीकंठैः शिवयुवतिभिः पंचभिरपि
प्रभिन्नाभिः शंभोर्नवभिरपि मूलप्रकृतिभिः |
चतुश्चत्वारिंशद्वसुदलकलाश्रत्रिवलय-
-त्रिरेखाभिः सार्धं तव शरणकोणाः परिणताः || 11 ||

त्वदीयं सौंदर्यं तुहिनगिरिकन्ये तुलयितुं
कवींद्राः कल्पंते कथमपि विरिंचिप्रभृतयः |
यदालोकौत्सुक्यादमरललना यांति मनसा
तपोभिर्दुष्प्रापामपि गिरिशसायुज्यपदवीं || 12 ||

नरं वर्षीयांसं नयनविरसं नर्मसु जडं
तवापांगालोके पतितमनुधावंति शतशः |
गलद्वेणीबंधाः कुचकलशविस्रस्तसिचया
हठात्त्रुट्यत्कांच्यो विगलितदुकूला युवतयः || 13 ||

क्षितौ षट्पंचाशद्द्विसमधिकपंचाशदुदके
हुताशे द्वाषष्टिश्चतुरधिकपंचाशदनिले |
दिवि द्विःषट्त्रिंशन्मनसि च चतुःषष्टिरिति ये
मयूखास्तेषामप्युपरि तव पादांबुजयुगं || 14 ||

शरज्ज्योत्स्नाशुद्धां शशियुतजटाजूटमकुटां
वरत्रासत्राणस्फटिकघटिकापुस्तककरां |
सकृन्न त्वा नत्वा कथमिव सतां संनिदधते
मधुक्षीरद्राक्षामधुरिमधुरीणाः फणितयः || 15 ||

कवींद्राणां चेतःकमलवनबालातपरुचिं
भजंते ये संतः कतिचिदरुणामेव भवतीं |
विरिंचिप्रेयस्यास्तरुणतरशृंगारलहरी-
-गभीराभिर्वाग्भिर्विदधति सतां रंजनममी || 16 ||

सवित्रीभिर्वाचां शशिमणिशिलाभंगरुचिभि-
-र्वशिन्याद्याभिस्त्वां सह जननि संचिंतयति यः |
स कर्ता काव्यानां भवति महतां भंगिरुचिभि-
-र्वचोभिर्वाग्देवीवदनकमलामोदमधुरैः || 17 ||

तनुच्छायाभिस्ते तरुणतरणिश्रीसरणिभि-
-र्दिवं सर्वामुर्वीमरुणिमनि मग्नां स्मरति यः |
भवंत्यस्य त्रस्यद्वनहरिणशालीननयनाः
सहोर्वश्या वश्याः कति कति न गीर्वाणगणिकाः || 18 ||

मुखं बिंदुं कृत्वा कुचयुगमधस्तस्य तदधो
हरार्धं ध्यायेद्यो हरमहिषि ते मन्मथकलां |
स सद्यः संक्षोभं नयति वनिता इत्यतिलघु
त्रिलोकीमप्याशु भ्रमयति रवींदुस्तनयुगां || 19 ||

किरंतीमंगेभ्यः किरणनिकुरुंबामृतरसं
हृदि त्वामाधत्ते हिमकरशिलामूर्तिमिव यः |
स सर्पाणां दर्पं शमयति शकुंताधिप इव
ज्वरप्लुष्टान् दृष्ट्या सुखयति सुधाधारसिरया || 20 ||

तटिल्लेखातन्वीं तपनशशिवैश्वानरमयीं
निषण्णां षण्णामप्युपरि कमलानां तव कलां |
महापद्माटव्यां मृदितमलमायेन मनसा
महांतः पश्यंतो दधति परमाह्लादलहरीं || 21 ||

भवानि त्वं दासे मयि वितर दृष्टिं सकरुणा-
-मिति स्तोतुं वांछन्कथयति भवानि त्वमिति यः |
तदैव त्वं तस्मै दिशसि निजसायुज्यपदवीं
मुकुंदब्रह्मेंद्रस्फुटमकुटनीराजितपदां || 22 ||

त्वया हृत्वा वामं वपुरपरितृप्तेन मनसा
शरीरार्धं शंभोरपरमपि शंके हृतमभूत् |
यदेतत्त्वद्रूपं सकलमरुणाभं त्रिनयनं
कुचाभ्यामानम्रं कुटिलशशिचूडालमकुटं || 23 ||

जगत्सूते धाता हरिरवति रुद्रः क्षपयते
तिरस्कुर्वन्नेतत्स्वमपि वपुरीशस्तिरयति |
सदापूर्वः सर्वं तदिदमनुगृह्णाति च शिव-
-स्तवाज्ञामालंब्य क्षणचलितयोर्भ्रूलतिकयोः || 24 ||

त्रयाणां देवानां त्रिगुणजनितानां तव शिवे
भवेत्पूजा पूजा तव चरणयोर्या विरचिता |
तथाहि त्वत्पादोद्वहनमणिपीठस्य निकटे
स्थिता ह्येते शश्वन्मुकुलितकरोत्तंसमकुटाः || 25 ||

विरिंचिः पंचत्वं व्रजति हरिराप्नोति विरतिं
विनाशं कीनाशो भजति धनदो याति निधनं |
वितंद्री माहेंद्री विततिरपि संमीलितदृशा
महासंहारेऽस्मिन्विहरति सति त्वत्पतिरसौ || 26 ||

जपो जल्पः शिल्पं सकलमपि मुद्राविरचना
गतिः प्रादक्षिण्यक्रमणमशनाद्याहुतिविधिः |
प्रणामः संवेशः सुखमखिलमात्मार्पणदृशा
सपर्यापर्यायस्तव भवतु यन्मे विलसितं || 27 ||

सुधामप्यास्वाद्य प्रतिभयजरामृत्युहरिणीं
विपद्यंते विश्वे विधिशतमखाद्या दिविषदः |
करालं यत्क्ष्वेलं कबलितवतः कालकलना
न शंभोस्तन्मूलं तव जननि ताटंकमहिमा || 28 ||

किरीटं वैरिंचं परिहर पुरः कैटभभिदः
कठोरे कोटीरे स्खलसि जहि जंभारिमकुटं |
प्रणम्रेष्वेतेषु प्रसभमुपयातस्य भवनं
भवस्याभ्युत्थाने तव परिजनोक्तिर्विजयते || 29 ||

स्वदेहोद्भूताभिर्घृणिभिरणिमाद्याभिरभितो
निषेव्ये नित्ये त्वामहमिति सदा भावयति यः |
किमाश्चर्यं तस्य त्रिनयनसमृद्धिं तृणयतो
महासंवर्ताग्निर्विरचयति नीराजनविधिं || 30 ||

चतुःषष्ट्या तंत्रैः सकलमतिसंधाय भुवनं
स्थितस्तत्तत्सिद्धिप्रसवपरतंत्रैः पशुपतिः |
पुनस्त्वन्निर्बंधादखिलपुरुषार्थैकघटना-
-स्वतंत्रं ते तंत्रं क्षितितलमवातीतरदिदं || 31 ||

शिवः शक्तिः कामः क्षितिरथ रविः शीतकिरणः
स्मरो हंसः शक्रस्तदनु च परामारहरयः |
अमी हृल्लेखाभिस्तिसृभिरवसानेषु घटिता
भजंते वर्णास्ते तव जननि नामावयवतां || 32 ||

स्मरं योनिं लक्ष्मीं त्रितयमिदमादौ तव मनो-
-र्निधायैके नित्ये निरवधिमहाभोगरसिकाः |
भजंति त्वां चिंतामणिगुणनिबद्धाक्षवलयाः
शिवाग्नौ जुह्वंतः सुरभिघृतधाराहुतिशतैः || 33 ||

शरीरं त्वं शंभोः शशिमिहिरवक्षोरुहयुगं
तवात्मानं मन्ये भगवति नवात्मानमनघं |
अतः शेषः शेषीत्ययमुभयसाधारणतया
स्थितः संबंधो वां समरसपरानंदपरयोः || 34 ||

मनस्त्वं व्योम त्वं मरुदसि मरुत्सारथिरसि
त्वमापस्त्वं भूमिस्त्वयि परिणतायां न हि परं |
त्वमेव स्वात्मानं परिणमयितुं विश्ववपुषा
चिदानंदाकारं शिवयुवति भावेन बिभृषे || 35 ||

तवाज्ञाचक्रस्थं तपनशशिकोटिद्युतिधरं
परं शंभुं वंदे परिमिलितपार्श्वं परचिता |
यमाराध्यन्भक्त्या रविशशिशुचीनामविषये
निरालोकेऽलोके निवसति हि भालोकभुवने || 36 ||

विशुद्धौ ते शुद्धस्फटिकविशदं व्योमजनकं
शिवं सेवे देवीमपि शिवसमानव्यवसितां |
ययोः कांत्या यांत्याः शशिकिरणसारूप्यसरणे-
-र्विधूतांतर्ध्वांता विलसति चकोरीव जगती || 37 ||

समुन्मीलत्संवित्कमलमकरंदैकरसिकं
भजे हंसद्वंद्वं किमपि महतां मानसचरं |
यदालापादष्टादशगुणितविद्यापरिणति-
-र्यदादत्ते दोषाद्गुणमखिलमद्भ्यः पय इव || 38 ||

तव स्वाधिष्ठाने हुतवहमधिष्ठाय निरतं
तमीडे संवर्तं जननि महतीं तां च समयां |
यदालोके लोकांदहति महति क्रोधकलिते
दयार्द्रा या दृष्टिः शिशिरमुपचारं रचयति || 39 ||

तटित्त्वंतं शक्त्या तिमिरपरिपंथिस्फुरणया
स्फुरन्नानारत्नाभरणपरिणद्धेंद्रधनुषं |
तव श्यामं मेघं कमपि मणिपूरैकशरणं
निषेवे वर्षंतं हरमिहिरतप्तं त्रिभुवनं || 40 ||

तवाधारे मूले सह समयया लास्यपरया
नवात्मानं मन्ये नवरसमहातांडवनटं |
उभाभ्यामेताभ्यामुदयविधिमुद्दिश्य दयया
सनाथाभ्यां जज्ञे जनकजननीमज्जगदिदं || 41 ||

गतैर्माणिक्यत्वं गगनमणिभिः सांद्रघटितं
किरीटं ते हैमं हिमगिरिसुते कीर्तयति यः |
स नीडेयच्छायाच्छुरणशबलं चंद्रशकलं
धनुः शौनासीरं किमिति न निबध्नाति धिषणां || 42 ||

धुनोतु ध्वांतं नस्तुलितदलितेंदीवरवनं
घनस्निग्धश्लक्ष्णं चिकुरनिकुरुंबं तव शिवे |
यदीयं सौरभ्यं सहजमुपलब्धुं सुमनसो
वसंत्यस्मिन्मन्ये वलमथनवाटीविटपिनां || 43 ||

तनोतु क्षेमं नस्तव वदनसौंदर्यलहरी-
-परीवाहः स्रोतःसरणिरिव सीमंतसरणिः |
वहंती सिंदूरं प्रबलकबरीभारतिमिर-
-द्विषां बृंदैर्बंदीकृतमिव नवीनार्ककिरणं || 44 ||

अरालैः स्वाभाव्यादलिकलभसश्रीभिरलकैः
परीतं ते वक्त्रं परिहसति पंकेरुहरुचिं |
दरस्मेरे यस्मिंदशनरुचिकिंजल्करुचिरे
सुगंधौ माद्यंति स्मरदहनचक्षुर्मधुलिहः || 45 ||

ललाटं लावण्यद्युतिविमलमाभाति तव य-
-द्द्वितीयं तन्मन्ये मकुटघटितं चंद्रशकलं |
विपर्यासन्यासादुभयमपि संभूय च मिथः
सुधालेपस्यूतिः परिणमति राकाहिमकरः || 46 ||

भ्रुवौ भुग्ने किंचिद्भुवनभयभंगव्यसनिनि
त्वदीये नेत्राभ्यां मधुकररुचिभ्यां धृतगुणं |
धनुर्मन्ये सव्येतरकरगृहीतं रतिपतेः
प्रकोष्ठे मुष्टौ च स्थगयति निगूढांतरमुमे || 47 ||

अहः सूते सव्यं तव नयनमर्कात्मकतया
त्रियामां वामं ते सृजति रजनीनायकतया |
तृतीया ते दृष्टिर्दरदलितहेमांबुजरुचिः
समाधत्ते संध्यां दिवसनिशयोरंतरचरीं || 48 ||

विशाला कल्याणी स्फुटरुचिरयोध्या कुवलयैः
कृपाधाराधारा किमपि मधुराभोगवतिका |
अवंती दृष्टिस्ते बहुनगरविस्तारविजया
ध्रुवं तत्तन्नामव्यवहरणयोग्या विजयते || 49 ||

कवीनां संदर्भस्तबकमकरंदैकरसिकं
कटाक्षव्याक्षेपभ्रमरकलभौ कर्णयुगलं |
अमुंचंतौ दृष्ट्वा तव नवरसास्वादतरला-
-वसूयासंसर्गादलिकनयनं किंचिदरुणं || 50 ||

शिवे शृंगारार्द्रा तदितरजने कुत्सनपरा
सरोषा गंगायां गिरिशचरिते विस्मयवती |
हराहिभ्यो भीता सरसिरुहसौभाग्यजननी
सखीषु स्मेरा ते मयि जननि दृष्टिः सकरुणा || 51 ||

गते कर्णाभ्यर्णं गरुत इव पक्ष्माणि दधती
पुरां भेत्तुश्चित्तप्रशमरसविद्रावणफले |
इमे नेत्रे गोत्राधरपतिकुलोत्तंसकलिके
तवाकर्णाकृष्टस्मरशरविलासं कलयतः || 52 ||

विभक्तत्रैवर्ण्यं व्यतिकरितलीलांजनतया
विभाति त्वन्नेत्रत्रितयमिदमीशानदयिते |
पुनः स्रष्टुं देवांद्रुहिणहरिरुद्रानुपरता-
-न्रजः सत्त्वं बिभ्रत्तम इति गुणानां त्रयमिव || 53 ||

पवित्रीकर्तुं नः पशुपतिपराधीनहृदये
दयामित्रैर्नेत्रैररुणधवलश्यामरुचिभिः |
नदः शोणो गंगा तपनतनयेति ध्रुवममुं
त्रयाणां तीर्थानामुपनयसि संभेदमनघं || 54 ||

निमेषोन्मेषाभ्यां प्रलयमुदयं याति जगती
तवेत्याहुः संतो धरणिधरराजन्यतनये |
त्वदुन्मेषाज्जातं जगदिदमशेषं प्रलयतः
परित्रातुं शंके परिहृतनिमेषास्तव दृशः || 55 ||

तवापर्णे कर्णेजपनयनपैशुन्यचकिता
निलीयंते तोये नियतमनिमेषाः शफरिकाः |
इयं च श्रीर्बद्धच्छदपुटकवाटं कुवलयं
जहाति प्रत्यूषे निशि च विघटय्य प्रविशति || 56 ||

दृशा द्राघीयस्या दरदलितनीलोत्पलरुचा
दवीयांसं दीनं स्नपय कृपया मामपि शिवे |
अनेनायं धन्यो भवति न च ते हानिरियता
वने वा हर्म्ये वा समकरनिपातो हिमकरः || 57 ||

अरालं ते पालीयुगलमगराजन्यतनये
न केषामाधत्ते कुसुमशरकोदंडकुतुकं |
तिरश्चीनो यत्र श्रवणपथमुल्लंघ्य विलस-
-न्नपांगव्यासंगो दिशति शरसंधानधिषणां || 58 ||

स्फुरद्गंडाभोगप्रतिफलिततातंकयुगलं
चतुश्चक्रं मन्ये तव मुखमिदं मन्मथरथं | [सुख]
यमारुह्य द्रुह्यत्यवनिरथमर्केंदुचरणं
महावीरो मारः प्रमथपतये सज्जितवते || 59 ||

सरस्वत्याः सूक्तीरमृतलहरीकौशलहरीः
पिबंत्याः शर्वाणि श्रवणचुलुकाभ्यामविरलं |
चमत्कारश्लाघाचलितशिरसः कुंडलगणो
झणत्कारैस्तारैः प्रतिवचनमाचष्ट इव ते || 60 ||

असौ नासावंशस्तुहिनगिरिवंशध्वजपटि
त्वदीयो नेदीयः फलतु फलमस्माकमुचितं |
वहत्यंतर्मुक्ताः शिशिरकरनिश्वासगलितं
समृद्ध्या यत्तासां बहिरपि च मुक्तामणिधरः || 61 ||

प्रकृत्या रक्तायास्तव सुदति दंतच्छदरुचेः
प्रवक्ष्ये सादृश्यं जनयतु फलं विद्रुमलता |
न बिंबं तद्बिंबप्रतिफलनरागादरुणितं
तुलामध्यारोढुं कथमिव विलज्जेत कलया || 62 ||

स्मितज्योत्स्नाजालं तव वदनचंद्रस्य पिबतां
चकोराणामासीदतिरसतया चंचुजडिमा |
अतस्ते शीतांशोरमृतलहरीमम्लरुचयः
पिबंति स्वच्छंदं निशि निशि भृशं कांजिकधिया || 63 ||

अविश्रांतं पत्युर्गुणगणकथाम्रेडनजपा
जपापुष्पच्छाया तव जननि जिह्वा जयति सा |
यदग्रासीनायाः स्फटिकदृषदच्छच्छविमयी
सरस्वत्या मूर्तिः परिणमति माणिक्यवपुषा || 64 ||

रणे जित्वा दैत्यानपहृतशिरस्त्रैः कवचिभि-
-र्निवृत्तैश्चंडांशत्रिपुरहरनिर्माल्यविमुखैः |
विशाखेंद्रोपेंद्रैः शशिविशदकर्पूरशकला
विलीयंते मातस्तव वदनतांबूलकबलाः || 65 ||

विपंच्या गायंती विविधमपदानं पशुपते-
-स्त्वयारब्धे वक्तुं चलितशिरसा साधुवचने |
तदीयैर्माधुर्यैरपलपिततंत्रीकलरवां
निजां वीणां वाणी निचुलयति चोलेन निभृतं || 66 ||

कराग्रेण स्पृष्टं तुहिनगिरिणा वत्सलतया
गिरीशेनोदस्तं मुहुरधरपानाकुलतया |
करग्राह्यं शंभोर्मुखमुकुरवृंतं गिरिसुते
कथंकारं ब्रूमस्तव चिबुकमौपम्यरहितं || 67 ||

भुजाश्लेषान्नित्यं पुरदमयितुः कंटकवती
तव ग्रीवा धत्ते मुखकमलनालश्रियमियं |
स्वतः श्वेता कालागुरुबहुलजंबालमलिना
मृणालीलालित्यं वहति यदधो हारलतिका || 68 ||

गले रेखास्तिस्रो गतिगमकगीतैकनिपुणे
विवाहव्यानद्धप्रगुणगुणसंख्याप्रतिभुवः |
विराजंते नानाविधमधुररागाकरभुवां
त्रयाणां ग्रामाणां स्थितिनियमसीमान इव ते || 69 ||

मृणालीमृद्वीनां तव भुजलतानां चतसृणां
चतुर्भिः सौंदर्यं सरसिजभवः स्तौति वदनैः |
नखेभ्यः संत्रस्यन्प्रथममथनादंधकरिपो-
-श्चतुर्णां शीर्षाणां सममभयहस्तार्पणधिया || 70 ||

नखानामुद्योतैर्नवनलिनरागं विहसतां
कराणां ते कांतिं कथय कथयामः कथमुमे |
कयाचिद्वा साम्यं भजतु कलया हंत कमलं
यदि क्रीडल्लक्ष्मीचरणतललाक्षारसचणं || 71 ||

समं देवि स्कंदद्विपवदनपीतं स्तनयुगं
तवेदं नः खेदं हरतु सततं प्रस्नुतमुखं |
यदालोक्याशंकाकुलितहृदयो हासजनकः
स्वकुंभौ हेरंबः परिमृशति हस्तेन झडिति || 72 ||

अमू ते वक्षोजावमृतरसमाणिक्यकुतुपौ
न संदेहस्पंदो नगपतिपताके मनसि नः |
पिबंतौ तौ यस्मादविदितवधूसंगरसिकौ
कुमारावद्यापि द्विरदवदनक्रौंचदलनौ || 73 ||

वहत्यंब स्तंबेरमदनुजकुंभप्रकृतिभिः
समारब्धां मुक्तामणिभिरमलां हारलतिकां |
कुचाभोगो बिंबाधररुचिभिरंतः शबलितां
प्रतापव्यामिश्रां पुरदमयितुः कीर्तिमिव ते || 74 ||

तव स्तन्यं मन्ये धरणिधरकन्ये हृदयतः
पयःपारावारः परिवहति सारस्वतमिव |
दयावत्या दत्तं द्रविडशिशुरास्वाद्य तव य-
-त्कवीनां प्रौढानामजनि कमनीयः कवयिता || 75 ||

हरक्रोधज्वालावलिभिरवलीढेन वपुषा
गभीरे ते नाभीसरसि कृतसंगो मनसिजः |
समुत्तस्थौ तस्मादचलतनये धूमलतिका
जनस्तां जानीते तव जननि रोमावलिरिति || 76 ||

यदेतत्कालिंदीतनुतरतरंगाकृति शिवे
कृशे मध्ये किंचिज्जननि तव यद्भाति सुधियां |
विमर्दादन्योन्यं कुचकलशयोरंतरगतं
तनूभूतं व्योम प्रविशदिव नाभिं कुहरिणीं || 77 ||

स्थिरो गंगावर्तः स्तनमुकुलरोमावलिलता-
-कलावालं कुंडं कुसुमशरतेजोहुतभुजः |
रतेर्लीलागारं किमपि तव नाभिर्गिरिसुते
बिलद्वारं सिद्धेर्गिरिशनयनानां विजयते || 78 ||

निसर्गक्षीणस्य स्तनतटभरेण क्लमजुषो
नमन्मूर्तेर्नारीतिलक शनकैस्त्रुट्यत इव |
चिरं ते मध्यस्य त्रुटिततटिनीतीरतरुणा
समावस्थास्थेम्नो भवतु कुशलं शैलतनये || 79 ||

कुचौ सद्यः स्विद्यत्तटघटितकूर्पासभिदुरौ
कषंतौ दोर्मूले कनककलशाभौ कलयता |
तव त्रातुं भंगादलमिति वलग्नं तनुभुवा
त्रिधा नद्धं देवि त्रिवलि लवलीवल्लिभिरिव || 80 ||

गुरुत्वं विस्तारं क्षितिधरपतिः पार्वति निजा-
-न्नितंबादाच्छिद्य त्वयि हरणरूपेण निदधे |
अतस्ते विस्तीर्णो गुरुरयमशेषां वसुमतीं
नितंबप्राग्भारः स्थगयति लघुत्वं नयति च || 81 ||

करींद्राणां शुंडान्कनककदलीकांडपटली-
-मुभाभ्यामूरुभ्यामुभयमपि निर्जित्य भवती |
सुवृत्ताभ्यां पत्युः प्रणतिकठिनाभ्यां गिरिसुते
विधिज्ञे जानुभ्यां विबुधकरिकुंभद्वयमसि || 82 ||

पराजेतुं रुद्रं द्विगुणशरगर्भौ गिरिसुते
निषंगौ जंघे ते विषमविशिखो बाढमकृत |
यदग्रे दृश्यंते दशशरफलाः पादयुगली-
-नखाग्रच्छद्मानः सुरमकुटशाणैकनिशिताः || 83 ||

श्रुतीनां मूर्धानो दधति तव यौ शेखरतया
ममाप्येतौ मातः शिरसि दयया धेहि चरणौ |
ययोः पाद्यं पाथः पशुपतिजटाजूटतटिनी
ययोर्लाक्षालक्ष्मीररुणहरिचूडामणिरुचिः || 84 ||

नमोवाकं ब्रूमो नयनरमणीयाय पदयो-
-स्तवास्मै द्वंद्वाय स्फुटरुचिरसालक्तकवते |
असूयत्यत्यंतं यदभिहननाय स्पृहयते
पशूनामीशानः प्रमदवनकंकेलितरवे || 85 ||

मृषा कृत्वा गोत्रस्खलनमथ वैलक्ष्यनमितं
ललाटे भर्तारं चरणकमले ताडयति ते |
चिरादंतःशल्यं दहनकृतमुन्मूलितवता
तुलाकोटिक्वाणैः किलिकिलितमीशानरिपुणा || 86 ||

हिमानीहंतव्यं हिमगिरिनिवासैकचतुरौ
निशायां निद्राणं निशि चरमभागे च विशदौ |
वरं लक्ष्मीपात्रं श्रियमतिसृजंतौ समयिनां
सरोजं त्वत्पादौ जननि जयतश्चित्रमिह किं || 87 ||

पदं ते कीर्तीनां प्रपदमपदं देवि विपदां
कथं नीतं सद्भिः कठिनकमठीकर्परतुलां |
कथं वा बाहुभ्यामुपयमनकाले पुरभिदा
यदादाय न्यस्तं दृषदि दयमानेन मनसा || 88 ||

नखैर्नाकस्त्रीणां करकमलसंकोचशशिभि-
-स्तरूणां दिव्यानां हसत इव ते चंडि चरणौ |
फलानि स्वःस्थेभ्यः किसलयकराग्रेण ददतां
दरिद्रेभ्यो भद्रां श्रियमनिशमह्नाय ददतौ || 89 ||

ददाने दीनेभ्यः श्रियमनिशमाशानुसदृशी-
-ममंदं सौंदर्यप्रकरमकरंदं विकिरति |
तवास्मिन्मंदारस्तबकसुभगे यातु चरणे
निमज्जन्मज्जीवः करणचरणः षट्चरणतां || 90 ||

पदन्यासक्रीडापरिचयमिवारब्धुमनसः
स्खलंतस्ते खेलं भवनकलहंसा न जहति |
अतस्तेषां शिक्षां सुभगमणिमंजीररणित-
-च्छलादाचक्षाणं चरणकमलं चारुचरिते || 91 ||

गतास्ते मंचत्वं द्रुहिणहरिरुद्रेश्वरभृतः
शिवः स्वच्छच्छायाघटितकपटप्रच्छदपटः |
त्वदीयानां भासां प्रतिफलनरागारुणतया
शरीरी शृंगारो रस इव दृशां दोग्धि कुतुकं || 92 ||

अराला केशेषु प्रकृतिसरला मंदहसिते
शिरीषाभा चित्ते दृषदुपलशोभा कुचतटे |
भृशं तन्वी मध्ये पृथुरुरसिजारोहविषये
जगत्त्रातुं शंभोर्जयति करुणा काचिदरुणा || 93 ||

कलंकः कस्तूरी रजनिकरबिंबं जलमयं
कलाभिः कर्पूरैर्मरकतकरंडं निबिडितं |
अतस्त्वद्भोगेन प्रतिदिनमिदं रिक्तकुहरं
विधिर्भूयो भूयो निबिडयति नूनं तव कृते || 94 ||

पुरारातेरंतःपुरमसि ततस्त्वच्चरणयोः
सपर्यामर्यादा तरलकरणानामसुलभा |
तथा ह्येते नीताः शतमखमुखाः सिद्धिमतुलां
तव द्वारोपांतस्थितिभिरणिमाद्याभिरमराः || 95 ||

कलत्रं वैधात्रं कतिकति भजंते न कवयः
श्रियो देव्याः को वा न भवति पतिः कैरपि धनैः |
महादेवं हित्वा तव सति सतीनामचरमे
कुचाभ्यामासंगः कुरवकतरोरप्यसुलभः || 96 ||

गिरामाहुर्देवीं द्रुहिणगृहिणीमागमविदो
हरेः पत्नीं पद्मां हरसहचरीमद्रितनयां |
तुरीया कापि त्वं दुरधिगमनिःसीममहिमा
महामाया विश्वं भ्रमयसि परब्रह्ममहिषि || 97 ||

कदा काले मातः कथय कलितालक्तकरसं
पिबेयं विद्यार्थी तव चरणनिर्णेजनजलं |
प्रकृत्या मूकानामपि च कविताकारणतया
कदा धत्ते वाणीमुखकमलतांबूलरसतां || 98 ||

सरस्वत्या लक्ष्म्या विधिहरिसपत्नो विहरते
रतेः पातिव्रत्यं शिथिलयति रम्येण वपुषा |
चिरं जीवन्नेव क्षपितपशुपाशव्यतिकरः
परानंदाभिख्यं रसयति रसं त्वद्भजनवान् || 99 ||

प्रदीपज्वालाभिर्दिवसकरनीराजनविधिः
सुधासूतेश्चंद्रोपलजललवैरर्घ्यरचना |
स्वकीयैरंभोभिः सलिलनिधिसौहित्यकरणं
त्वदीयाभिर्वाग्भिस्तव जननि वाचां स्तुतिरियं || 100 ||

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ सौंदर्यलहरी |